THE ORIENTAL THOUGHT SERIES

★

General Editor :—
DR. G. V. DEVASTHALI
M.A., B.T., Ph.D.

No. 6

श्रीभास्कररायविरचितम्

शिवनामकल्पलतारत्नालवालकाव्यम् ।

Edited by :
DR. G. V. DEVASTHALI
M.A., B.T., Ph.D.

★

NASIK, January 1957

॥ श्रीः ॥

श्रीभास्कररायविरचितं

शिवनामकल्पलतालवालकाव्यम् ॥

मोक्षस्यैकनिदानमब्जनयनब्रह्मेन्द्रचन्द्रादिभिर्
देवैः प्राणपदीकृतं कलिमलप्रध्वंसिधर्माङ्कुरः ।
भारत्यापि सुदुर्निरूप[1]महिम त्रय्यन्तरे गोपितम्
वक्तुर्मङ्गलदं शिवेति विमलं नामैव नस्तारकम् ॥ १ ॥

आनन्त्यौदार्यसत्त्वाद्दतिभृतिहृतिभिः स्वल्पसेवातितोषात्
संकष्टोच्छित्त्युपेक्षाभयहितवचनैरुत्तम[2]त्वाच्च शम्भुः ।
सेव्यो विष्णूपमन्युद्रुहिणमुनिसुतश्रीदमन्येच्छुदेवैर्
दक्षश्रीराम[3]देवैरशिशुपशुवधूराक्षसैः साक्षिभिर्नः ॥ २ ॥

नाथ त्वच्छक्तितत्त्वाव्ययर[4]चितभगव्यूहमूर्त्यङ्गसाङ्ग-
प्रत्यङ्गोपाङ्गकृत्यागमभजनकलांशादिनिष्कर्षमूढाः ।
[5]त्वन्नामापि त्यजामो यदि दुरितहरं सान्ववायाः कृतार्थाः
केनोपायेन जायेमहि कलिहतके जन्मभाजो वयं हा[6] ॥ ३ ॥

शिवेति द्वौ वर्णौ पर[7]पदपतद्धंसगरुतौ
तटौ संसाराब्धेः[8] सविषयकबोधाङ्कुरदले ।
श्रुतेरन्तर्गोपायिततररहस्याहृतिचरौ
घरट्ट[9]ग्रावाणौ भवविटपि[10]बीजौघदलने ॥ ४ ॥

---

१. °रूपि° B. २. °रुत्तमा° B. ३. °रामैर्देव° B. ४. °व्ययरचिभग° B; °व्ययचरितभगं° D. ५. °त्वंन्नामा° BD. ६. ह B. ७. °परापिरपद° B. ८. °ध्वेः B. ९. घरट्टगवाणौ वा B. १०. °पी° K.

स्वामिन् कर्माणि कायिके न जरसा[११] शक्तोऽस्मि, नो मानसे
चाञ्चल्यान्मनसो, न निर्धनतया पूर्तेष्टदानादिके ॥
तस्माद्वाचिकमेत्र[१२] कर्म विदुषां[१३] साध्यं विदित्वा भव–
न्नाम्नामष्टशतं निरुध्य जनुषः[१४] साफल्यमीहेतमाम्[१५] ॥ ९ ॥

शिवनामकल्पवल्ल्याः[१६] शिवचरितानन्दकाननभवायाः ।
रुचिरं रत्नावालं[१७] रचये[१८] सत्पद्यरत्नवरैः ॥ ६ ॥

प्रकृत्या नैर्मल्यादमलगुणयोगादपि[१९] शमा–
जगत्याधारत्वाद्व्रजदमृतदानाच्च भवतः ।
बलादिच्छाशक्तेः प्रथितपुरिभद्रश्रव इति
प्रतीतस्त्वं लिङ्गे त्रिपुरहर तस्मादसि शिवः ॥ १ ॥

तवेश्वरत्वं त्रिजगद्विलक्षणं त्वमीश्वराणां महतामपीश्वरः ।
जगत्तिरोधानकरः[२०] श्रुतीरितस्त्वं पञ्चविंशोऽपि[२१] परो महेश्वरः ॥ २ ॥

शं भावयसि च भवसे शं च भवसि चेति वा देव ।
त्वं देवदारुविपिने लिङ्गे प्रथितोऽस्यतः शम्भुः ॥ ३ ॥

नाकोऽपि येन पिहितो मुनिकण्वमूर्धवल्मीकवेणुजधनुस्त्रितयाग्रजन्मा ।
यः सप्तशीर्षफणिरूप उदारकर्मा चापस्तमावहसि नाथ ततः पिनाकी[२२] ॥ ४ ॥

मतिमयोऽखिलजीवसमष्टिरप्यमथि दक्षमखे हिमगुर्वृथा ।
इति धिया दयया विधृतस्त्वया शिरसि[२३] तेन भवाञ्शशिशेखरः ॥ ५ ॥

---

११. रजसा B. १२. °कर्मपेव B. १३. वुदुशां B. १४. °ष्यः B. १५.साकल्य° B. १६. °ल्याः BD. १७. रत्नालवालं D; but here the third letter ल appears to be scored out by the scribe himself. १८. रचये-त्सत्पद्य° B. १९. °गुणयों° B. २०. °धानरकः B. २१ °शोद° D. २२ °कि B. २३. शिरशि B.

वामार्धेन क्रीडसि त्वं त्रिलोकीवक्रा[२४]चारो वल्गुमोदोऽसि तस्मात् ।
विश्वो[२५]त्तीर्णः स्रष्टृतामप्यतीतः प्रेयानात्मा कथ्यसे वामदेवः ॥ ६ ॥

विषमाणि विविधशक्ती[२६]न्यक्षीणि विलक्षणानि वा[२७]क्षाणि ।
हर हेमकूटशैले लिङ्गे व्यक्तोऽस्यतो विरूपाक्षः ॥ ७ ॥

नदीपूरैः शोधादथ [२८]सुरधुनीशोधनात् तत्प्रदानात् ।
कचग्रन्थेर्भेदोऽतिशायितगुणः स्यात् कपर्दो वराटः ॥
तदाधारः पूरस्थगनमपि तत्पावनं तत्प्रकाश-
क्षमत्वं मैराळीं[२९] प्रथयासि तनुं छागलण्डे कपर्दी ॥ ८ ॥

[३०]नेमाङ्गनं प्रकृतिपूरुषं रवेरन्तश्च रूपयुगपद्वपुस्तव ।
वेधोलिकाम्बुकणतोऽरुणासिताज्जातः शिव त्वमिति [३१]नीललोहितः ॥ ९ ॥

कर एव सुखं धत्से [३२]भक्तानां कुरुषे च तत् ।
[३३]पीठे चन्द्रपुराभिख्ये नाम्ना ख्यातोऽसि शङ्करः ॥ १० ॥

शिवतृतपुरस्थलिङ्गम[३४]ध्ये प्रकटः संस्त्रिगुणात्मकालल्लोकैः ।
शुचिशक्तिदृशाग्निभिस्त्रिशूलं विदधत् त्वं प्रथितोसि शूलपाणिः ॥ ११ ॥

द्रुहिणस्यैकं वदनं मिथ्यावचनं दृष्ट्वा सद्य[३५]श्छिन्नम्
न ततो वेधोमरणं शम्भोः क्व पुनर्हिंसाज[३६]न्यं पापम् ॥
अग्र दण्डार्थं वहासि त्वं त[३७]ज्जनशिक्षार्थं खट्वाया
वा चरणं यत्तद्विमलं सत्प्रथितस्तेन [३८]त्वं खट्वाङ्गी ॥ १२ ॥

---

२४. °कीचक्राचोरो वल्गु° B २५ °त्ति° D. २६. °शक्ति° B. २७. वाक्षीणि B
२८. सूर° B. २९. मैरालिं B. ३०. नेमागानं B. ३१. निऌ° D. ३२. भ-
क्तान्नां D. ३३. पिठे D. ३४. °मध्य° B. ३५. सद्यछिन्नं D. ३६. °जयन्यं D.
३७. B omits तज्जनशिक्षार्थं ..... यतद्विमळं सत; while D gives all this correctly but adds त्वं after सत् and reads सत्वं प्रथितस्तेन etc.
३८. स्त्वं B.

वितरन् हरये तपस्यते पदरेखाजनितं सुदर्शनम् ।
वपुरर्धमपि प्रियाय ते प्रथितस्त्वं भुवि विष्णुवल्लभः ॥ १३ ॥

पशवः परमात्मनि धीविरहाद्[३९] द्विपदोऽपि नराश्च सुराः शिपयः ।
तदनुग्रहकृद्धृदयं प्रविशन्[४०] प्रथितोऽसि[४१] विभो शिपिविष्ट इति ॥ १४ ॥

नाथासि हिमाचलमुमां मनसा तां नाथसेऽथ तन्नाथः[४२] ।
प्रकटोऽसि देविकायां लिङ्गे तेनाम्बिकानाथः ॥ १५ ॥

क्ष्वेलं गङ्गामिन्दोर्लेखामाद्योत्थां[४३] वा कान्तिं कण्ठे ।
बिभ्रन्माण्डल्येशे[४४] लिङ्गे विख्यातोऽसि त्वं श्रीकण्ठः ॥ १६ ॥

[४५]दासानुरस्यावपसीति तर्णकान् भक्तात्मकानोदन[४६]बालकोभयम् ।
पोषाय गृह्णास्यथ तेषु सौहृदं[४७] पुष्णासि तस्मादसि भक्तवत्सलः ॥ १७ ॥

सत्तामात्रमधिष्ठानमुपादानमसि विश्वस्य ।
सलिलस्याधिष्ठात्री[४८] मूर्तिस्तत्र तेन विश्रुतोऽसि भवः ॥ १८ ॥

यदेतदाभाति बहुप्रकारं जगत्[४९] तदन्ते सकलं शृणासि[५०] ।
अधिष्ठितो मध्यमदेशलिङ्गे धरण्यधिष्ठातृ[५१]तयापि शर्वः ॥ १९ ॥

ऊर्ध्वाधोमध्यभुवाममरासुरमानवप्रकरनिबिडानाम् ।
अन्तर्यमनात् त्रिपुटीसाक्षितया शङ्कर त्रिलोकीशस्त्वम्[५२] ॥ २० ॥

दधदविगलमिन्द्रपविप्रहति[५३]प्रभवं कालम् ।
कालञ्जरगिरिशिखरे प्रथितस्त्वं शितिकण्ठः ॥ २१ ॥

---

३९. विरहद्° B ४० °विशत् B. ४१. °शि B. ४२. तन्नाथः B ४३. °माद्यात्थां D. ४४. °न्मादुल्लेशे B ४५. दासानुरस्यावपासितर्णका° B. ४६. भक्तानोदन° B ४७. सौहृदंष्णासि B ४८. °ष्ठात्रि B. ४९ °देते D. ५०. शृणोसि D. ५१. धरिण्य° B. ५२ °कीश त्वम् D. ५३. B drops प्रहति

मतिर्धृतिः कृतिर्बलं शरीरमिन्द्रियं मनः ।
समस्तमेव ते शिवा भवानतः शिवाप्रियः ॥ २२ ॥

[५४]उच्चस्यन्तर्निखिलजनानामुद्गच्छस्यप्यथ जगदूर्ध्वम् ।
प्रव्यक्तः सन् कनखललिङ्गे वायोरन्तर्वसासि तदुग्रः ॥ २३ ॥

कमलभवकरोटिव्रातमालाधरत्वात्तदधिकबलशाली भासि कङ्कालनाथः ।
पराशिव करवीरक्षेत्रमध्यस्थलिङ्गे निवससि सुरवन्द्यो नामतस्त्वं कपाली ॥२४॥

कर्पूरश्वेतस्त्वं कामेच्छोर्दूरे निष्कामानामासन्नः[५५] ।
दर्पं कन्दर्पस्य प्राक्षिण्वन् विख्यातो भूर्लोके कामारिः ॥ २५ ॥

लीलया जगदम्बया पिहितेषु ते नयनेष्वभूद्
अन्धकारत एव यः स[५६] तु भैरवेण निषूदितः ।
तादृशः कृपया त्वया शिव गाणपत्यमवापितः ।
प्रेमवानपि नामतः पुनरन्धकासुरसूदनः ॥ २६ ॥

अमरतटिनी निजं बलमवेक्ष्य गर्वाद्भव-
च्छिरसि गगनादपीपतदतीव वेगोद्धुरा ।
पटुतरजटाटवीमुपगता न दृष्टा क्वचित्
परमशिव तां दधन्निगदितोऽसि गङ्गाधरः ॥ २७ ॥

उडुशशिरविसंहर्ता प्रलयसमयसप्तार्चिः ।
तमुपरि नयने बिभ्रद्भव भवसि ललाटाक्षः ॥ २८ ॥

मार्कण्डेयः कालमुखाद्विमुक्तो दग्धो रुद्रः काल इति प्रसिद्धः ।
तुर्यां मूर्तिं बिभ्रदुमाधिनाथ प्रख्यातोऽसि त्वं भुवि कालकालः ॥ २९ ॥

दैतेयेषु जलन्धरादिषु स्वीयानामपकारकेष्वपि ।
सालोक्यादिपदानि[५७] दित्ससि त्वं ख्यातोऽसि ततः[५८] कृपानिधिः ॥ ३० ॥

---

५४. उच्चय॰ D. ५५. ॰निष्कामावापन्नः B. ५६. ॰सु त॰ B. ५७. ॰नि पदतानि॰ B.
५८. B reads भुवि for ततः But that goes against matrical requirement.

[५९]भिया वातो वाति ज्वलनदिनकरौ शक्रमृत्युप्रचेतो–
मुखा देवास्त्वत्तो भयचकितहृदस्तत्पराः स्वस्वकार्ये ।
नभोऽधिष्ठात्री ते तनुर[६०]तिविपुला सप्तगोदावरे च
प्रतीतस्त्वं लिङ्गे गिरिवरतनयानाथ तेनासि भीमः ॥ ३१ ॥

अमोघचरितत्वं व्यनक्ति परशुस्ते ।
शिवागमवचोभिस्ततः परशुहस्तः ॥ ३२ ॥

दारुवनस्थैस्त्वा[६१]भिचरद्भिः प्रेषित एणो वेदशरीरः ।
याचनमुद्रा वा तत्र हस्ते तत्प्रथितोऽसि त्वं मृगपाणिः ॥ ३३ ॥

विविधतनुको दक्षध्वंसे बभूविथ यः पुरा
मृगमनुययाथैकोऽन्यस्तु स्थितो[६२] मखमण्डपे ।
अखिलसरितः पारावारान् पवित्रतरान् धरान्
शिरसि[६३] कवितापन्नान् बिभ्रच्छ्रुतोऽसि जटाधरः ॥ ३४ ॥

हरेर्मूर्ध्नि मेरौ हिमे मन्दराद्रौ भवत्केलिभूम्यो भवत्केलिर[६४]म्याः ।
तदूर्ध्वे परा ज्ञानलभ्या[६५]स्ति तासु स्थितत्वेन जातोऽसि कैलासवासी ॥ ३५ ॥

वर्माभावे परशरनयनैः स्पृश्यो दृश्यो भवति हि सकृत्तः ।
स्वातन्त्र्येण द्वयमपि तिरयन् दुष्प्रापत्वात् प्रभवसि कवची ॥ ३६ ॥

[६६]घोरैका ते तनुरन्या शिवेति द्वे ते बिभ्रज्जगतीरक्षकोऽसि ।
दुष्टा जीवा दमनेनैव रक्ष्याः[६७] पूर्णत्वाद्वा[६८] कथितस्त्वं कठोरः ॥ ३७ ॥

---

५९. भीया B. ६०. °रिति° B. ६१. °स्त्वभि° B. ६२. °स्थितोऽसि मख° B.
६३. शिरसि त्वताप° B. ६४. °गम्याः B. ६५. °लभ्यासु B. ६६. घोरेकान्ते B.
६७. रक्षाः B. ६८. °दा B.

स्थूलं लिङ्गं करणमिति यत् त्रयं[६९] वपुषां नृणाम्
भक्तानां चेत्तदखिलमपि त्वमन्तयासि क्षणात् ।
यद्वा नाथ त्रिपुरदहनादलौकिकचर्यया
श्रीशैलेऽसि प्रथिततनुमानिति त्रिपुरान्तकः ॥ ३८ ॥

त्वं गवामनयतः कुपितोऽपि प्रार्थितोऽसि सुकृतेन वृषेण ।
तेन तद्ध्वजरथो वृषशैले विश्रुतोऽस्यभिधयापि[७०] वृषाङ्कः ॥ ३९ ॥

नन्द्यारोहात् त्रैपुरदाहे हरिणा पृष्ठे[७१]
वेदाश्वानां गोवृषरूपैः समुपात्तत्वात् ।
धर्मज्ञानैश्वर्यविरागेषु निरूढत्वाद्[७२]
विख्यातोऽसि त्वं सुरवृन्दे वृषभारूढः[७३] ॥ ४० ॥

स्वाङ्गे भस्म विलिम्पन्नाथ ज्ञानाङ्गशिरोव्रतमुपदिशसि[७४] ।
भूतेशाभिधनीर्थेऽपि त्वं भस्मोद्धूलितविग्रहनामा[७५] ॥ ४१ ॥

चन्दनस्पर्शशीतामृतस्यन्दिनी सान्त्ववाक् सा भवेदोथ सामानि वा ।
तैः[७६] प्रयुक्तैरतीवेश संप्रीयसे गीयसे तेन लोकेषु सामप्रियः ॥ ४२ ॥

षड्जोदात्तमुखाः स्वरा अवयवा वेदैकवपुषः
साम्बव्यञ्जनको भवान् स्वरमयी शक्तिस्तव मता ।
ॐकारावयवेषु मन्त्रभृतयो रुद्रेश्वरशिवाः
सर्वे यस्य विभूतितां विदधते सोऽसि स्वरमयः ॥ ४३ ॥

---

६९. त्रितयं B. ७०. °धिया° B. ७१. पृष्टे B. ७२. विरूढ° BD. But D has the correct reading given in the margin. ७३. वृषारूढः B. ७४. °शि B. ७५. °नाम D. ७६. तै B.

साम्ब ऋग्वेदकोऽस्यागलान्तादा च नाभेर्यजुर्वेदरूप
नाभिदेशादधः सामवेदस्तेन[७७] तेऽभूत् त्रयीमूर्ति नाम ॥ ४४ ॥

[७८]ईश्वरत्वावाधिर्यः स सर्वेश्वरः ।
तस्य नेशः परं त्वन्ततोऽनीश्वरः ॥ ४५ ॥

षट्त्रिंशत्[७९]तत्त्वी त्वय्येवाध्यस्ता ।
सर्वाधिष्ठानं तत्त्वं सर्वज्ञः ॥ ४६ ॥

अन्तर्य[८०]मयंस्त्वं भूतान्याखिलानि ।
भूयः काथितोऽसि श्रुत्या परमात्मा ॥ ४७ ॥

भास्वदादयो लोचनानि ते मानसातिगं त्वां विदन्ति[८१] नो ।
भान्तमन्वमी भान्ति[८२] साम्प्रतं तेन सोमसूर्याग्नि[८३]लोचनः ॥ ४८ ॥

दुग्धमात्रस्य कुहरे यथा घृतं प्राणिमात्रस्य दहरे तथा भवान् ।
चेतसा संमथित एव लभ्यते हूयमानं त्वमखिलं यतो[८४] हविः ॥ ४९ ॥

वेदः पादो यूपो दंष्ट्रानलचयनरसनवदनै[८५]स्तनूरुहधर्मकः ।
स्रौवश्चञ्चुः सर्पिर्नासो दिवसरजनीनयनयुगः करः सवनत्रयम् ॥
औद्गात्रान्तो वेदीस्कन्धश्चरणयुगलमुपनिषत्प्रवर्ग्य–
कचभ्रमि[८६]र्वक्षोदाक्षिण्यो मन्त्रास्फिग्[८७]त्रिविधमखकरणतनुकोऽसि
यज्ञमयाभिधः ॥ ५० ॥

---

७७. °वेदतेन D. ७८. ङ° DB ७९. °त्रीं° B. ८०. °यमं° D. ८१. वदान्ति B. ८२. भान्त B. ८३. °सूर्याग्नि° B. ८४. ततः B. ८५. °दनस्तनू° D. ८६. भ्रमी° B. ८७. °स्फ° B.

मूर्तिष्वष्टास्वीश तवैका रजनीशो ज्योतिष्टोमस्तस्य हविश्चैडविडश्च ।
सौराष्ट्रस्थस्त्वं शिव गङ्गायमुनस्थो गौर्या साकं नित्यविहारी[88]ति च सोमः ॥९१॥

सर्वेश ब्रह्मतत्त्वेन्द्रियाविषयकलाभूतसादाख्यमूर्ति-
ष्वेकैकश्ये[89]नपञ्चात्मसु तव वदनेष्वादिही[90]नेषु सत्सु ।
योऽयं सुन्दोपसुन्दासुरहननिमित्ताप्सरस्तल्लजेक्षा-
प्रादुर्भावः स तद्वक्त्यातिरभसकृतेऽजायथाः पञ्चवक्त्रः ॥ ९२ ॥

यो विधीश्वरदशा सदाशिवस्तद्दशाऽपि खलु यः सदाशिवः ।
तस्य कालकलना क्व ते तदस्यौपचारिकतया सदाशिवः ॥ ९३ ॥

केवलं चिन्मयं ज्योतिरात्मैव काशी
तेन सर्वाणि विश्वान्यतीतापि विश्वम् ।
तत्र वासात्परिच्छेदबुध्या गृहीतः
काशिकाधीश्वरोऽपीश विश्वेश्वरस्त्वम् ॥ ९४ ॥

श्रीगौर्या वीरः स्वीकृतः पुत्रबुध्या क्रोधाग्निस्वेदोत्पादितो भद्रनामा ।
भद्रायोगाद्राजपुत्रासिशाली तद्वांस्तद्रूपस्त्वं ततो वीरभद्रः ॥ ९५ ॥

शशिकरगणमुखसंख्यानां प्रमथतुषितमयमुख्यानाम् ।
अधिपतिरसि शिव कैलासे पुरि निवससि गणनाथस्त्वम् ॥ ९६ ॥

अन्तरिक्षभूमिनाकसंस्थिता यः सहस्रशः सहस्रसंमिताः ।
रुद्रनामिकाः प्रजाः सृजत्यतः स्थाणुनामको भवान् प्रजापतिः ॥ ९७ ॥

[91]त्वद्वीर्ययोगेन भवेद्धिरण्यं यद्वाग्निरूपोऽस्यथवा जलार्धे ।
त्यक्तेन वीर्येण बभूव हैममण्डं तदीशासि हिरण्यरेताः ॥ ९८ ॥

---

८८. ⁰रिति B. ८९. °श्येन B. ९०. ⁰हिनेषु B. ९१. तद्वी⁰ B.

कैलासे शिखरिणि पौलस्त्यप्रागल्भ्यं तृणसमतामाप ।
एवं सत्याभिभवकारी कस्तस्मात् त्वं भवसि हि दुर्धर्षः[९२] ॥ ५९ ॥

भूरिगुणे पदवाक्ये निष्कलुषेषु समर्थः
पर्वतराडपि शम्भो तेन मतोऽसि गिरीशः ॥६०॥

मेरुपर्वतमपि धनुर्हेतवे कृशयासितराम्[९३] ।
पर्वते निवससि सुखं नाथ तद्भवसि[९४] गिरिशः ॥ ६१ ॥

दुःखं नाथ न ते पापं च व्यसनम् ।
त्रैलोक्याधिपते तस्मादस्यनघः ॥ ६२ ॥

अभिचारसमर्थदारुकावनगैः प्रहितान्[९५]हीन् दधत् ।
गरुडादपि बिभ्यतस्तनौ कथितोऽसि भुजङ्गभूषणः ॥ ६३ ॥

[९६]भर्ज्यन्ते दुरितानां सन्दोहा यदवाप्त्या ।
गायत्रीप्रतिपाद्यस्त्वं तस्मादसि भर्गः ॥ ६४ ॥

वाग्विषये त्वं मरुस्वि[९७] भवसि त्वां हि मनागभिदधति न वाचः[९८]
दिव्यरथे वा पुरदहनविधौ[९९] वेदमयाः किल चतुरतुरङ्गाः ।
चक्रयुगं ते दिनरजनिकरौ बाणशरीरभृद्भवदुपेन्द्रो
मेरुरभूत्ते धनुरुरगपतिर्ज्या[१००]भवदीश तदासि गिरिधन्वा ॥ ६५ ॥

[१०१]प्रेमपूरिते विभाति वैदिकस्तवात्मवाचि ।
सर्वपर्वतेष्वपीति नामतो गिरिप्रियोऽसि ॥ ६६ ॥

---

९२. दुर्धर्षः B. ९३. कर्षतिरुराम् B. ९४. तद्भव D. ९५. ०तामहीं D.
९६. वर्ज्यन्ते D. ९७. ०महचिरिव B. ९८. वाचा D. ९९ ०वधौ B.
१००. र्ज्या० B. १०१. This whole line is missing in B.

वाराणस्यां शिव[१०२] त्वद्भक्तांस्तुदन्तं गजेन्द्रं
विप्रैस्सृष्टाभिचाराख्याघ्रं च शूलेन हत्वा ।
चर्म[१०३]द्वन्द्वं तदीयं प्रावृत्य विभ्राजमानोऽ-
स्येकाभ्रे चन्द्रलेखामौले ततः **कृत्तिवासाः** ॥ ६७ ॥

भवान् पूर्व[१०४]माभाति पश्चाददिदं जगद्भाति यद्वा पुराणामरिः ।
तनोः कारणस्थूलसूक्ष्मात्मनो विनाशेन वा ते **पुरारातिता** ॥ ६८ ॥

पराक्रम[१०५]मती विरागयशसी श्रिया सह जगत्[१०६]पतित्वमिति षट् ।
गुणा भगपदो[१०७]दितास्त्वयि वसन्त्यतः श्रुतिगिरेरि[१०८]तोऽसि **भगवान्** ॥ ६९ ॥

मथ्नन्तितरां यदवै[१०९]दिकांस्त्वत्पारिषदाः प्रमथा मताः ।
तानीश सदा परिपालयन् भक्तैरु[११०]दितः **प्रमथाधिपः** ॥ ७० ॥

रुद्राच्युतेश[१११]ब्रह्मणां कोट्यो[११२] यया गीर्णाः क्षणात् ।
तद्गोचरो न त्वं विभो तेनाभवो **मृत्युञ्जयः** ॥ ७१ ॥

दुर्ज्ञेयमूर्तिधरोऽप्याम्नातके प्रकटः ।
सूक्ष्मादपीश कृशस्तेनासि **सूक्ष्मतनुः** ॥ ७२ ॥

सत्ता भानं प्रियमिति चानुस्यूतं सर्वेष्वर्थेष्वनुभवसिद्धं लोके ।
सच्चित्सौख्यं त्रयमपि यौष्माकीणं रूपं तस्माद्भवासि **जगद्व्यापीति** ॥ ७३ ॥

वटतरुनिकटे मुनी[११३]नखिलान् सुरान् कमलभवमुखान् प्रबोधनमुद्रया ।
उपादिशसि परं महस्तव दाक्षिणामुख पराशिव तन्मतोऽसि जगद्गुरुः ॥७३॥

---

१०२. शिवस्त्व° B. १०३. मर्च° B. १०४ °मायाति B. १०५. पराक्रमवती B.
१०६. जत्पति° B. १०७. °चेता° B. १०८. °रितो भगवान् यवः B.
१०९. °वैदिका° B ११०. °रदितः B. १११. ब्रह्माणां B. ११२. कोटयो या B.
११३. मुनि° D.

पृथ्वीपाथोज्वलनपवनव्योमरूपेषु भूते–
ष्वल्पाल्पानि प्रथमगादितान्युत्तराणीशितॄणि[११४] ।
व्योम्नोऽपीशोऽस्यथ च गगनं कुन्तलास्ते विराजो
गङ्गाधारा वियदिव जटास्तेन च व्योमकेशः ॥ ७९ ॥

सुब्रह्मण्येन पृष्टे प्रणवपरमार्थोऽत्र क[११५] इति
ब्रह्मण्यज्ञेक्षणे स्वं दिशति सति कारानियमिते ।
आत्मा वै पुत्रनामेत्युपदिशति तौ मोचितवति
त्वय्यज्ञाक्षाजपुत्रैः स्तुत इति महासेनजनकः ॥ ७६ ॥

परशिव त्वया ये निषूदिता गजजलन्धरत्रैपुरादयः ।
अपुनरागमं ते पदं गतास्तव चमत्कृतश्चारुविक्रमः[११६] ॥ ७७ ॥

बालो धातृललाटाज्जातः सन्नरुदस्त्वं
सोऽरोदीद्यदरोदीदग्नित्वादपि रुद्रः
उल्लाघीकरणाद्वा निश्चिन्तीकरणाद्वा
संवर्ते रोदयासि[११७] ब्रह्मादीनिति रुद्रः ॥ ७८ ॥

धरणीजलादिषु तथात्मगणेष्वनुविश्य तान् नियमयन्[११८] नटसि ।
अथवा पिशाचानिकरान्नटयन् भुवनावनाय[११९] ननु भूतपतिः ॥ ७९ ॥

वृक्षाभः स्तब्धो दिवि भुवि पुर उद्दिश्य स्फारं
वर्षाणि स्थिरतर उदतिष्ठस्त्वम् ।

---

११४. ⁰शतॄणि B. ११५. क is missing in D. ११६. चत्कृतचारु° B.
११७. रोदसि D ११८. ⁰यमंन्नटसि B. ११९. भुवनाय D; वनावनाय B.

ज्योतिर्लिङ्गेऽपि प्रभवति सति[120] नैश्चल्यात्कल्पान्ते
वातैर्न चलसि तदासि स्थाणुः ॥ ८० ॥

ब्रह्माण्डस्याधो दशशतफणो बुध्न्यभावं[121] प्रयाते
पाताले साधुर्वहति वसुधां सार्णवद्वीपशैलाम् ।
[122]तन्मूर्धभ्योऽन्ते विषमयवपुः कालसंकर्षणाख्यो
रुद्रो भूत्वेदं दहसि निखिलं सोऽस्यहिर्बुध्न्यनामा ॥ ८१ ॥

महेश दारुकावने महर्षिसिद्धसेविते
[123]तदङ्गनाः पतिव्रताः परीक्षमाणया[124] धिया ।
मनो भवातिशायिनीं[125] मनोहरां दधत् तनू-
मुपागतस्ततस्तदाश्रमेषु भिक्षितुं[126] दिगम्बरः ॥ ८२ ॥

मेदिनीभूतमाभिमन्यसे शर्व इति पाथसो भवपदेनाभिमानी[127] ।
रुद्रनाम्ना तु वैश्वानरस्योग्र इति मारुतं भीम इत्यम्बरस्य ॥
भानुमीशान इति शीतभानुं महादेव इत्यात्मनो यज्वनो वा[128] ।
मन्यसे पशुपतीभूय शम्भो जगद् व्याप्य तिष्ठन्भवस्यष्टमूर्तिः ॥ ८३ ॥

यत् किंचिद् ब्रह्माण्डे सर्वो वै रुद्रस्तत् ।
संख्येयत्त्वाभावाद्विख्यातोऽनेकात्मा ॥ ८४ ॥

त्वयि निवसति जन्तुरास्तितागुण इति तानि तत्र प्रयोजनम् ।
त्वमपि भवसि तेषु तद्वपुः परशिव तेन मतोऽसि सात्त्विकः ॥ ८५ ॥

घनघृतमिव सत्त्वमात्रपिण्डो न तु वपुरण्वपि ते रजस्तमोक्तम् ।
शिव भवसि न[129] चैव कूटयोधी हरसि मलानिति शुद्धविग्रहस्त्वम् ॥ ८६ ॥

---

१२०. सति is missing in B. १२१. बुध्यभावं D. १२२. ०न्मूर्धन्यो० D.
१२३. °स्तद° D. °तगन्द° B. १२४. परीमाणया I'. १२५. °भवाति° B.
१२६. भिक्षितं B. १२७. °मानिनी B. १२८. वा is missing in B.
१२९. च नैव D.

पूर्वतो जगतो जनेः सर्वसंहारतः परे ।

वर्तमाने [१३०]जगत्यपि त्वमस्येवेति शाश्वतः ॥ ८७ ॥

गजासुरवधे खण्डास्तव जाताः परशवः ।
तदारभ्याखिलैर्देवैर्गीयसे खण्डपरशुः ॥ ८८ ॥

न जनिः शिव ते ।
तदासि त्वमजः ॥ ८९ ॥

अभिमातिगुणपञ्चपरुर्दशात्रिचतुरयुतविंशतिपाशतः ।
शिव पदभजनेन विमोचयन् पशुगणमिति पाशविमोचकः ॥ ९० ॥

पूर्णाहुत्या त्वयि सुहिते यज्ञे पूर्णे सति सुहिते ।
यष्टॄन् ध्यातॄनपि सुखयस्यार्यानितस्तदासि मृडः ॥ ९१ ॥

ख्यातं तन्त्रेषु पाशः पशुरथ पतिरित्येतत् त्रयमपि ।

त्वद्रूपं नाथ जीवान् नियमयसि नुतो मुक्तांश्च [१३१]कुरुषे ॥

ग्राम्यारण्याधिपत्यं वहसि च [१३२]यजमानात्माभिमातिमान्

[१३३]भक्तान् नेपालपीठे रमयासि नित्रसन्नासीः पशुपतिः ॥ ९२ ॥

द्युतिमोदव्यवहारासुरजातिष्वव्रतारात् ।
शशिमौले जगतीनामधिपत्वादपि देवः ॥ ९३ ॥

गीर्वाणानामपि मधुहादीनां नमनीयः स्तवनीयस्त्वं देवः ।

शशिबिम्बेऽधिष्ठात्री तव मूर्तिर्[१३४]जगदाप्याययतीति महादेवः ॥ ९४ ॥

न जायसे परिणमसि प्रवर्धसे न हीयसे न च विकृतोऽसि नश्यासि ।
त्वमव्ययैर्दशभिरपि क्षमादिभिः परिष्कृतः परशिव तेन चाव्ययः ॥ ९५ ॥

---

१३०. जत्यपि B. १३१. पुरुषे: D १३२. जयमाना° B. १३३. नेपालेश्वर-पीठरमयसि नित्रसन्नासीः पशुपतिः B reads this line as: १३४. जगद° B.

परशिव तव नामसंकीर्तनं कलिकलुषितचेतसां पावनम् ।
निवससि नगरे हरिश्चन्द्रके हरसि च दुरितानि स त्वं हरिः ॥ ९६ ॥

अधिमखं रदत्रिकासपूर्वकं परिहसन्तमवलोक्य पूषणम् ।
शिव भवानकृत पिष्टभागिनं गलितदन्तमिति **पूषदन्तभित्** ॥ ९७ ॥

पौलस्त्येनोन्नमनसमये कैलासाद्रेर्ब्रह्माण्डानामपि दहनकाले संवर्ते ।
युद्धेष्वन्येष्वपि बहुषु सन्तोषोद्रेकाद्देवीं पश्यन्नटसि शिव तस्माद्व्यग्रः ॥९८॥

पुरा देवो दक्ष इति शिव तवैकः श्वशुरकः

परो मर्त्यो दक्ष इति विटापिकन्योदरभवः[१३५] ।
प्रचेतःपुत्रोऽखिलमखफलदातापि च भवाँ-

स्तयोर्यज्ञौ ह व्यदलयदिति[१३६] दक्षाध्वरहरः ॥ ९९ ॥

परशिव जनयसि भव इति भणितः
स्थिरमपि रचयसि मृडपदगणितः ।
सुचरमचरमपि चरमगुणधरः

प्रहरसि[१३७] जगदिदमखिलमिति हरः ॥ १०० ॥

विष्णुब्रह्माद्यखिलदिविषद्वृते मखमण्डपे
वीरभद्रापतिमुपगतं सुरासुरमर्दनम् ।
कोपाटोपादरुणनयनो भगस्तमदीदृशत्
तन्नेत्रं स प्रसभमभिनत् ततो **भगनेत्रभित्** ॥ १०१ ॥

सांख्यो मूलप्रकृतिरिति यदाचख्यौ[१३८]

यत् पाराशर्यश्चिदिति गदितवाँस्तत्त्वम्[१३९] ।
सामर्थ्यं चाक्षरमपि भुवि नैव व्यक्तम्
लिङ्गे बाणाभिधमपि शिव इत्यव्यक्तः ॥ १०२ ॥

---

१३५. विटप B. १३६. व्यदलवातित B. १३७. प्रहसति B. १३८. यदाच B.
१३९. गदति तत्त्वं तत्व B. गदित तत्वं तत्त्वम् D.

अगणितकरचरणशिरोदंष्ट्रोदरयुक् प्रतिभयमाश्चर्यम् ।
युगपत् सृष्टिस्थितिलयकारि[१४०] च यदवच्छेदकभेदेन ॥
क्षेत्रे च सुवर्णाख्ये[१४१] प्रार्थितं लिङ्गे शिव तव यद्रूपम् ।
बहुविधकर्मज्ञानेन्द्रियपरिपूर्णं तादिति[१४२] सहस्राक्षः ॥१०३॥

जगदवनार्थमष्टसु धृतासु मूर्तिषु
स्मरहर[१४३] भास्करस्य तव मूर्तिरष्टमी ।
[१४४]गणनपथातिगांघ्रिमय विश्वरूपधृक्
श्रुतिगदितोऽसि शङ्कर ततः सहस्रपात् ॥ १०४ ॥

प्रतीकविदहंग्रहो भृतक इत्युपास्तेर्निजाद्
विधेः शिव[१४५] सलोकता शिवतदात्मता सार्पिता ।
भवन्ति स समीपता अमृतता[१४६]त्मविज्ञानतोऽ-
खिलं फलमतो भवेदिति मतोऽपवर्गप्रदः ॥ १०५ ॥

नात्रेति विभो नेदानीमिति नेदं ब्रह्मेति च वाचो यत्र प्रसरन्ति ।
नास्त्येव गुणानामन्तो न विभूतेः शेषोऽसि धराधृतेन त्वमनन्तः ॥१०६॥

तव पदकमले भजन्तो जनास्तारिता यत् त्वया
भवजलनिधितो महादेव[१४७] ताराख्यवर्णात्मकः ।
प्रणवमुपदिशन् द्विजान् काशिकायां परेतान्
अपि श्रुतिषु निगदित[१४८]स्तदन्वर्थनामा भवांस्तारकः ॥ १०७ ॥

---

१४०. च is missing in B. १४१. °वर्णाक्षे B. १४२. तदसि B. १४३. स्महर B. १४४. गणपथा° D. १४५. B omits from शिव in this line upto स (in समीपता) in the next line, both inclusive. १४६. अमतता° B. १४७. महादेव is missing in B, which has only अथवा instead. १४८. °दिता° B.

ग्रामाणां पतयोऽपि सोपपदेश्वरा भुवि भूरिश-
स्तेऽपि स्वाश्रितमात्रपोषण[१४९]परास्तथैव दिवौकसः ।
[१५०]ईशानामपि चेशितासि निजाश्रिता[१५१]श्रिततच्छ्रितान्
सर्वानप्यवसीशतापरमावधिः **परमेश्वरः** ॥ १०८ ॥

जानाति साम्ब तव नामरुचिं दधीचिर्[१५२]
जानाति ते पदनखाग्रबलं दशास्यः ।
जानाति दोर्बलपराक्रममेष मेरुर्
जानन्त्यमोघपटुबाणगतिं पुराणि ॥ १ ॥

[१५३]इयं शम्भोरष्टोत्तरशतकनामार्थविवृतिर्
विजातीयैरष्टोत्तरशतकवृत्तैर्विरचिता ।
फलं नामस्वार्थावगतिषु च भूम्नैव विदितं
बहूनां वृत्तानां प्रमितिरधिकाप्यत्र फलति ॥ २ ॥

इति काशिनिवासिसाग्निचित्यक्रतुकृद्[१५४] भास्कररायभारती ।
जनुषः सफलत्वसिद्धये शिवनामाष्टशतं व्यवर्वरीत् ॥ ३ ॥

इतिश्री[१५५]भारत्युपनामाख्यगम्भीररायदीक्षितात्मजभास्कररायाग्निचिता रचितं
श्रीशिवाष्टोत्तरशतनामकल्पवल्ल्या रत्नालवालं सम्पूर्णम् ॥

---

१४९ °पोपपर° B. १५०. ईशाना° B. १५१. °श्रितश्रिताच्छ्रि° B. १५२. °महेशो B. १५३. इति D. १५४ °क्रकुद्° B. १५५. The colophon in B is : इतिश्रीशिवनामकल्पलतारत्नालवालः समाप्तः ।